**दीर्घशाख** पु० दीर्घा शाखा यस्य । १शालवृक्षे संज्ञायां कन् टाप् अत इत्त्वम् । २एलापर्ण्याम् स्त्री राजनि० । वा कप् अत इत्त्वम् । दीर्घशाखिका ३नीलाम्लान्याम् राजनि० ।

**दीर्घशिम्बिका** स्त्री दीर्घा शिम्बी यस्य कप् ह्रस्वः । वृक्षे (नाकछिकनी) इति ख्याते राजनि० ।

**दीर्घशूक** पु० दीर्घः शूकोऽग्रमस्य । शालिभेदे संज्ञायां कन् । दीर्घशूके राजान्ने राजनि० कर्म० । २दीर्घे शूके न० ।

**दीर्घश्रवस्** पु० दीर्घं श्रवोऽस्य । दीर्घतमसः पुत्रे ऋषिभेदे "औशिजाय वणिजे दीर्घश्रवसे" ऋ० १।११२।११ "उशिक् संज्ञा दीर्घतमसः पत्नी तस्याः पुत्रो दीर्घश्रवा नाम कश्चिदृषिरनावृष्टौ जीवनार्थमकरोत् वाणिज्यम्" भा० २दीर्घकर्णयुक्ते त्रि० कर्म० । ३दीर्घे कर्णे न० ।

**दीर्घसत्र** न० कर्म० । १दीर्घकालिके यज्ञभेदे हेम० । २तत्कर्तरि त्रि० । "हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः" रघुः । दीर्घाणि सत्राणि कृतानि यत्र । ३तीर्थभेदे "ततो गच्छेत धर्मज्ञ ! दीर्घसत्रं यथाक्रमम् । तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः । दीर्घसत्रमुपासन्ते दीक्षिता नियतव्रताः । गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ! । राजसूयाश्वमेधाभ्यां फलं प्राप्नोति भारत !" भा० व० ८२ अ० । ४यावज्जीवकर्तव्ये अग्निहोत्रे न० "दीर्घसत्रं ह वा त उपयन्ति येऽग्निहोत्रं जुह्वत्येतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा" शत० ब्रा० १२।४।१।१

**दीर्घसत्रिन्** पु० दीर्घसत्रमस्त्यस्य इनि । १बहुकालिकसत्रकारके २यावज्जीवकर्तव्याग्निहोत्रिणि च, "यदेतस्य दीर्घसत्रिणोऽग्निहोत्रं जुह्वतोऽन्तरेणाग्नी युक्तं वा वियायात्" शत० ब्रा० १२।४।१।२

**दीर्घसुरत** पुंस्त्री० दीर्घं बहुकालव्यापकं सुरतमस्य । १कुक्कुरे त्रिका० स्त्रियां जातित्वात् ङीष् । कर्म० । २आयते सुरते न० ।

**दीर्घसूक्ष्म** पु० कर्म० । पात० सू० भाष्योक्ते प्राणायामभेदे तत्स्वरूपादि तत्रोक्तं यथा

"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" सू० । "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः । कोष्ठ्यस्य वायोर्निःसारणं प्रश्वासः तयोर्गतिविच्छेद उभयाभावः प्राणायामः" भा० । "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः" सू० । "यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद् भवति यथा तप्ते न्यस्तमुपले जलं सर्वतः सङ्कोचमापद्यते । तथा द्वयोर्युगपद्गत्यभावइति । त्रयोऽप्येते देशेन परिदृष्टाः, इयानस्य विषयो देशइति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः । सङ्ख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तद्वत् निगृहीतस्यैतावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा० । "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" सू० । "देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः उभयथा दीर्घसूक्ष्मः तत्पूर्वको भूमिजयात् क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्धएव देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेषः" भा० ।

**दीर्घसूत्र** त्रि० दीर्घेण चिरकालेन सूत्रमीप्सितव्यापारो यस्य । १चिरकालेन प्रारब्धकर्म्मानुष्ठातरि अमरः । "दीर्घसूत्रस्य आपत्प्राप्तिरितिहाससुखेन" भा० शा० १३७ अ० दर्शिता तथा "अनागतविधाता च प्रत्युत्पन्नमतिश्च यः । द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति । अत्रैव चेदमव्यग्रं शृणुष्वाख्यानमुत्तमम् । दीर्घसूत्रमुपाश्रित्य कार्य्याकार्य्यविनिश्चये । नातिगाधे जलाधारे सुहृदः शकुनास्त्रयः । प्रभूतमत्स्ये कौन्तेय ! बभूवुः सहचारिणः । तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभोऽपरः । दीर्घसूत्रश्च तत्रैकस्त्रयाणां सहचारिणाम् । कदाचित् तं जलाधारं मत्स्यबन्धाः समन्ततः । निःस्रावयामासुरथो निम्नेषु विविधैर्मुखैः । प्रक्षीयमाणं तं दृष्ट्वा जलाधारं भयागमे । अब्रवीद्दीर्घदर्शी तु तावुभौ सुहृदौ तदा । इयमापत् समुत्पन्ना सर्वेषां सलिलौकसाम् । शीघ्रमन्यत्र गच्छामः पन्था यावन्न दुष्यति । अनागतमनर्थं हि सुनयैर्यः प्रबाधयेत् । स न संशयमाप्नोति रोचतां भो व्रजामहे । दीर्घसूत्रस्तु यस्तत्र सोऽब्रवीत् सम्यगुच्यते । न तु कार्य्या त्वरा तावदिति मे निश्चिता मतिः । अथ सम्प्रतिपत्तिज्ञः प्राब्रवीद्दीर्घदर्शिनम् । प्राप्ते काले न मे किञ्चिन्न्यायतः परिहास्यते । एवं श्रुत्वा निरक्रामद्दीर्घदर्शी महामतिः । जगाम स्रोतसा तेन गम्भीरं